उत्पातक्षोभनिर्घातविक्षतानां प्रमाय च ।
कथयामि महाप्राज्ञ शृणुष्वैकमनाधुना ॥ * ॥
मङ्गला विजया भद्रा शिवा शान्तिर्धृतिः क्षमा ।
ऋद्धिर्वृद्धिर्मतिः सिद्धिस्तुष्टिः पुष्टिः श्रिया उमा ॥
दीप्तिः कान्तिर्यशो लक्ष्मीरीश्वरीति प्रकीर्त्तिता ।
विंशताश्चोत्तमा देव्यः सत्त्वभावव्यवस्थिताः ॥
प्रथमं संस्थिता वत्स ! सर्व्वसिद्धिप्रदायिकाः ।२०
ब्राह्मी जयावती शाक्री अजिता चापरा-
जिता ॥
जयन्ती मानसी माया दितिः श्वेता विमो-
हनी ।
शरण्या कौशिकी गौरी विमला ललिताजया ॥
अरुन्धती क्रिया दुर्गा राजसा इति वायुना ।
मध्यभागे स्थिता देव्यो युगानामशुभापहा ॥२०॥
काली रौद्री कपाली च घण्टाकर्णा मयूरिकी ।
बहुरूपा सुरूपा च त्रिनेत्रा रिपुहाम्बिका ॥
माहेश्वरी कुमारी च वैष्णवी सुरपूजिताः ।
वैवस्वती तथा घोरा कराली विकटादिभिः ॥
चर्च्चिका चेति धातुस्था देव्यस्त्रैलोक्यविश्रुताः ।
पूजितव्या मुनिश्रेष्ठ ! सर्व्वकामप्रसाधिकाः ।२०॥
सिद्धाशसुरगन्धर्व्वयक्षरक्षोगणैर्नुताः ।
भावकालाश्रयाः कार्य्यद्रव्यरूपफलप्रदाः ॥
प्रत्येकशः समस्ता वा कर्त्तव्या मुनिसत्तम ! ।
अथवा युगभेदेन पञ्च पञ्च प्रपूजिताः ॥”
इति देवीपुराणे संवत्सरदेवताविंशतिविधि-
नामाध्यायः ॥ (वर्षके, त्रि । यथा, भागवते ।
३ । २१ । २० ।
“नमाम्यभीक्ष्णं नमनीयपादं
सरोजमल्पीयसि कामवर्षम् ॥”)
वर्षकरी, स्त्री, (वर्षं तत्सूचनं रवेण करो-
तीति । वर्ष+कृ+टः । ङीप् ।) झिल्लिका ।
इति हेमचन्द्रः । ४ । २८२ ॥
वर्षकेतुः, पुं, (वर्षस्य वृष्टेः केतुरिव । सति वर्षे
भूरिश उत्पन्नत्वादस्य तथात्वम् ।) रक्तपुनर्नवा ।
इति राजनिर्घण्टः ॥ (अलर्कवंशीयकेतुमतः
पुत्रः । यथा, हरिवंशे । ३२ । ४० ।
“क्षेम्यस्य केतुमान् पुत्रो वर्षकेतुस्ततोऽभवत् ॥”)
वर्षकोषः, पुं, (वर्षस्य वत्सरस्य कोष इव । सर्व्ववर्ष-
ज्ञानवत्त्वात् तथात्वमस्य ।) दैवज्ञः । इति
शब्दरत्नावली ॥ (वर्षस्य अन्तःस्थितफलकोष
इव कोषः ।) मासः । इति शब्दमाला ॥
वर्षजं, त्रि, (वर्षात् जातमिति । जन्+डः ।) वृष्टि-
जातम् । वत्सरजातम् । जम्बुद्वीपजातम् ।
द्वीपांशजातम् । मेघजातम् । इति वर्षशब्द-
पूर्व्वजनधातोर्डप्रत्ययेन निष्पन्नम् ॥
वर्षणं, क्ली, (वृष्+ल्युट् ।) वृष्टिः । इति शब्द-
रत्नावली ॥ (यथा, मार्कण्डेयपुराणे । १०४।२१।
“तमेव सुचतः सर्व्वं रसं वै वर्षणाय यत् ।
रूपमाप्यायकं भास्वंस्तस्मै मेघाय ते नमः ॥”)
वर्षणिः, स्त्री, (वृष्+अनिः ।) वर्त्तनम् । क्षतिः ।
इत्युणादिकोषः ॥ क्रतुः । वर्षणम् । इति
संक्षिप्तसारोणादिवृत्तिः ॥

वर्षपर्व्वतः, पुं, (वर्षाणां भारतादीनां विभाजकः
पर्व्वत इति मध्यलोपी समासः ।) वर्षविभा-
जकगिरिः । यथा,—
“हिमवान् हेमकूटश्च निषधो मेरुरेव च ।
चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः ॥”
इति हारावली ॥
वर्षपाकी, [न्] पुं, (वर्षे वर्षाकाले पाकोऽस्त्यस्येति ।
वर्षपाक+इनिः ।) आम्रातकः । इति हेम-
चन्द्रः । ४ । २१८ ॥ (तथास्य पर्य्यायः ।
“आम्रातको वर्षपाकी ।” इति वैद्यकरत्न-
मालायाम् ॥)
वर्षपुष्पा, स्त्री, (वर्षे वर्षाकाले पुष्पं यस्याः ।)
सहदेवीलता । इति राजनिर्घण्टः ॥ (सहदेवी-
लताशब्देऽस्या विवृतिर्ज्ञेया ॥)
वर्षप्रियः, पुं, (वर्षो वर्षणं प्रियं यस्य ।) चातक-
पक्षी । इति त्रिकाण्डशेषः ॥
वर्षवरः, पुं, (वरतीति । वर आवरणे+अच् ।
वर्षस्य रेतोवर्षणस्य वर आवरकः ।) षण्ढः ।
इत्यमरः । २ । ८ । ६ ॥ खोजा । इति भाषा ॥
(यथा, रत्नावल्याम् २ अङ्के ।
“नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं
वामनः ॥”)
वर्षवृद्धिः, स्त्री, (वर्षस्य वृद्धिराधिक्यं यत्र ।)
जन्मतिथिः । इति स्मार्त्तव्याख्यादर्शनात् ॥ अथ
जन्मतिथिकृत्यम् । तन्मलमासे न कर्त्तव्यं चान्द्र-
मासीयत्वेन सावकाशत्वात् । न च तस्य सौर-
मासीयत्वं तथात्वे तन्मासे तत्तिथेः कदाचिद-
प्राप्तौ तद्वर्षे तत्कृत्यलोपापत्तेः । न चेष्टापत्तिः
प्रतिसंवत्सरन्तद्विधानात् । यथा ब्रह्मपुराणं
गर्गश्च ।
“सर्व्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रञ्च पितरौ तथा देवप्रजापतिः ।
प्रति संवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः ॥”
स्नातैस्तिलस्नातैः । प्रजापतिर्ब्रह्मा । तथा च
तत्तिथिमधिकृत्य ।
“तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥
मङ्गलपाणिभिः अभिप्रेतार्थसिद्धिर्मङ्गलं तद्धेतु-
तया गोरोचनादिकमपि मङ्गलं तेन घृत-
गुग्गुल्वादिपाणिभिरित्यर्थः । तथा च कृत्य-
चिन्तामणौ ।
“गुडदुग्धतिलानद्यान्जन्मभन्यैस्तु चन्दनम् ।
गुग्गुलुं निम्बसिद्धार्थं दूर्व्वागोरोचनायुतम् ।
संपूज्य भानुविप्रेशौ महर्षि प्रार्थयेदिदम् ॥
चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ! ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥”
स्वनक्षत्रञ्चेति स्वनक्षत्रं अश्विन्याद्यन्तर्गतजन्म-
कालीननक्षत्रम् । नामकरणे तथा दर्शनात् जन्म-
मासब्रह्मपुराणोक्तप्रणवादिनमोऽन्तेन नाम्नैव
पूजाविधानाच्च । तदन्ताने स्वनक्षत्राय नम
इत्युल्लेख्यम् ॥ * ॥ पूजायामर्घ्यानन्तरं पाद्य-
माह मत्स्यपुराणम् । अर्घ्यं पाद्यादिकञ्चैव
मधुपर्कं प्रयोजयेत् । पाद्यानन्तरं अर्घ्यमाह
नरसिंहपुराणम् । पाद्यञ्चैव तृतीयया चतुर्थ्यार्घ्यं
प्रदापयेत् । तृतीयया पुरुषसूक्तीयतृतीयया
ऋचा । उभयक्रमदर्शनादिच्छाविकल्पः । इति
श्रीदत्तः ॥ * ॥ श्रीपतिव्यवहारनिर्णये ।
“नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् ॥”
तथा ।
“द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजतेत् प्रयतस्तथा ॥
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् ।
प्रह्लादञ्च हनूमन्तं विभीषणमथार्च्चयेत् ॥”
रामोऽत्र परशुरामः । चिरजीविसाहचर्य्यात् ।
द्रौणिरश्वत्थामा ॥ * ॥ तथा,—
“स्वनक्षत्रं जन्मतिथिं प्राप्य सम्पूजयेन्नरः ।
षष्ठीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥”
योगियाज्ञवल्क्यः ।
“ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु ।
तद्विष्णोरिति मन्त्रेण स्नायादप्सु पुनः पुनः ॥
गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै ॥”
ध्यायेत् स्मरेत् । स च मन्त्रः ।
“तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥”
वामनपुराणम् ।
“सर्व्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।
नारायणं नमस्कृत्य सर्व्वकर्म्माणि कारयेत् ॥” * ॥
सङ्कल्पाकरणे निन्दामाह भविष्यपुराणम् ।
“सङ्कल्पेन विना राजन् ! यत्किञ्चित् कुरुते
नरः ।
फलञ्चाप्यल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत् ॥”
ब्रह्मपुराणम् ।
“प्रणवादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनामसर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ।
एकैकस्य प्रकुर्व्वीत यथोद्दिष्टं क्रमेण तु ॥”
गन्धपुष्पमात्रं पञ्चोपचाराद्यसम्भवे ।
“मन्त्राच्छतगुणं प्रोक्तं भक्त्या लक्षगुणोत्तरम् ।
भक्तिमन्त्रसमेतन्तु कोटि कोटि गुणोत्तरम् ॥
सर्व्वेषु कर्म्मोपदेशकं दक्षिणादिभिरर्च्चयेत् ।
तथोपदेष्टारमपि पूजयेच्च ततो गुरुम् ।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया ॥”
इति मत्स्यपुराणवचनात् ॥ * ॥
ततः कर्म्मानन्तरं तिलहोमस्तु पूजितदेवता-
नामभिः कार्य्यः ।
“एकैकां देवतां राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मज्ञ नाम्ना च प्रणवादिना ॥
होमयेदथ चैकैकं घृतसंयुक्तं होमयेत् ॥”
इति विष्णुधर्म्मोत्तरदर्शनात् ॥
एवं होमे स्वाहान्तता च मन्त्रस्य ।